श्रीपद्मनाभसूरिविरचितः

मध्वसिद्धान्तसारः

(पदार्थसङ्ग्रहः)

A PRIMER OF DVAITA VEDANTA

Edited by

Dr. D. N. Shanbhag

Dvaita Vedanta Studies & Research Foundation, Bangalore

श्रीपद्मनाभसूरिविरचितः

मध्वसिद्धान्तसारः

(पदार्थसङ्ग्रहः)

A PRIMER OF

DVAITA VEDĀNTA

Sanskrit Text with English Translation and Notes

Edited by

Dr. D N. Shanbhag

Dvaita Vedanta Studies & Research Foundation

BANGALORE

1994

MADHVASIDDHĀNTASĀRA (Padārthasaṅgraha)
[A Primer of Dvaita Vedānta] (Original Sanskrit text with English Translation & Notes) Edited by Dr. D. N. Shanbhag, Retd. Professor of Sanskrit, Karnatak University, Dharwad
Pages : xii - 114

Price : Rs. 24/-

Copies can be had from

The Hon. Secretary,
Dvaita Vedanta Foundation
No. 88, K. R. Road, R R. Choultry
Basavangudi, Bangalore - 560004

Printed by

S. I. Akalwadi
Manohar Printing Press
Market, Dharwad

Dedicated to

Vedagarbha Padmanabhasuri

लक्ष्मीपतिं सम्प्रणम्य सर्वज्ञादिगुरूनपि ।
पदार्थानां सङ्ग्रहोऽयं क्रियते शास्त्रतोऽञ्जसा ।।

I bow down to Viṣṇu, Lord of Lakṣmī and also to all preceptors beginning from the Omniscient (Śrī Madhvācārya) and compose this perfect compilation of categories according to scriptures.

PREFACE

PADĀRTHASAṄGRAHA popularly known as *MADHVA-SIDDHĀNTASĀRA* enumerates the tenets of the Dvaita Vedānta in a clear and concise way. *Tarkasaṅgraha*, *Arthasaṅgraha* and other texts of Nyāya and Mīmāṁsā present the tenets of those schools of philosophy in simple language for the benefit of beginners. *Padārthasaṅgraha of Padmanābhasūri* has followed this model and presented the Dvaita Vedānta tenets in this commonly accepted model. Apart from its simplicity, it also brings out the subtle metaphysical and theological implications of Dvaita philosophy. This text is useful both to the students and to the scholars.

Dr. D. N. Shanbhag, Retd. Professor of Sanskrit at the Karnatak University has edited this very useful text.

He has added translation and notes in English to enable the students and the scholars to consult it for their study and research. He is a Member of the Academic and Research Committee of Dvaita Vedanta Foundation and has been assisting the research and editing programme of the Foundation in that capacity. He has edited *'Pūrṇaprajña Darśana'* earlier in the Foundation's publications.

We thank him for his co-operation.

N. NARASIMHA RAU
Chairman
Dvaita Vedanta Foundation

EDITOR SUBMITS

Dr. B. N. K. Sharma, my revered guru and reputed scholar of Dvaita Vedānta writes :

"To Vedagarbha Padmanābhācārya (C. 18th Cent.), we owe an excellent manual of Dvaita theology and metaphysics, entitled *Madhvasiddhāntosāra* (printed, Bombay, 1893) in 5000 granthas. This work together with the author's own commentary, is a good compendium of Mādhva doctrine and theology, written in the traditional manner of text-books of Nyāya-Vaiśeṣika schoolmen, giving numerous quotations from the standard works of the system, including the originals used by Madhva as well as extracts from the commentaries of Jayatīrtha and others. It is a most useful and reliable reference book and could be safely studied by those wishing to have a correct knowledge of the doctrines of Madhva from without. It is in many ways analogous to *Yatīndramatadīpikā* on the Rāmānuja's system. It deserves to be translated into English and other languages as a proper manual of Mādhva tenets". *(History of the Dvaita School of Vedānta and its Literature,* Motilal Banarsidass, Delhi, II Edn. 1981 p. 546).

But it should be noted that the author refers to himself as Padmanābha, Padmanābhadhīmat and Padmanābhasūri and his original work is *Padārthasaṅgraha* whereas his own commentary on it is named *Madhvasiddhāntasāra.* The relevant verses are quoted below :

(1) लक्ष्मीपतिं सम्प्रणम्य सर्वज्ञादिगुरूनपि ।
पदार्थानां सग्रहोऽयं क्रियते शास्त्रतोऽञ्जसा ॥

(Beginning of *Padārthasaṅgraha*)

रघुनाथार्यशिष्येण पद्मनाभेन धीमता ।
कृतः पदार्थसंक्षेपोऽप्यनुगृह्णन्तु सूरयः ॥
इति श्रीपद्मनाभसूरिविरचितः पदार्थसंग्रहः समाप्तः ।
श्रीकृष्णार्पणमस्तु ॥ (End of the work)

It is stated in the commentary—

(1) वेदगर्भकुलीनेन पद्मनाभेन धीमता ।
मध्वसिद्धान्तसारोऽयं तन्यते सेव्यतां बुधैः ॥ (Beginning)

(2) महतामनुग्रहेणैव पद्मनाभेन सूरिणा ।
मध्वसिद्धान्तसारोऽयं सप्रमाणः कृतोऽञ्जसा ॥

इति श्रीमन्महाभाष्यरघुनाथार्यशिष्येण वेदगर्भानन्तपद्मनाभेन कृते पदार्थसंग्रहव्याख्याने मध्वसिद्धान्तसारे मोक्षभंगप्रकरणं समाप्तम् । समाप्तश्चायं ग्रन्थः । श्रीकृष्णार्पणमस्तु ॥ (End)

Hence the author is Padmanābha or Anantapadmanābha and he was born in the Vedagarbha family. He was the disciple of Raghunāthācārya who was the author of a work named '*Tāratamyasaṅgraha*' (तारतम्यं चास्मद्गुरुपादैः सम्यगुपपादितं तारतम्यसंग्रहे तत्रैवानुसन्धेयम् । पदार्थसंग्रहः, p. 29).

Nothing more is known. The *Padārthasaṅgraha* with the author's commentary *Madhvasiddhāntasāra* was printed in Nirnayasagar Press, Bombay, and was published by T. R. Krishnacharya of Kumbhakonam in 1815 Vijaya Saṁvatsara corresponding to 1893 A. D. Pandit T. R. Krishnacharya prepared a Kannada version of the *Madhvasiddhāntasāra* and published it in Devanāgarī script together with original Sanskrit text of *Padārtha-saṅgraha* in 1922 A. D. from Śrī Manmadhvavilās Pustakalaya, Kumbhakonam. It is named as "*Śrīmanmadhvasiddhāntasārasaṅgraha*". Hence, the tradition began to identify the commentary with the original work. And as the name of the commentary *(Madhvasiddhāntasāra)* expressed the contents of the work directly it became more popular than the name of the original work *(Padārthasaṅgraha)*. But all agree that it is a 'Primer of Dvaita Vedānta' and therefore, this edition has been titled 'A Primer of Dvaita Vedānta' and the names of the original work and of the commentary have been retained prominently.

It is certainly a primer or manual of Dvaita Vedānta. Its usefulness has been pointed out by Dr. B.N.K. Sharma in his observations quoted above.

It was Dr. Sharma who as God willed, suggested me to study Dvaita Vedānta. This happened in 1951 when I was a First year student of Kanara College, Kumta (now named as Dr. A V. Baliga College of Arts & Science) of which he was the Principal. This seed sown by him was often watered by him, even though due to my other interests I could not show any progress as per his expectations. The distance between us also helped me to be far below his expectations.

But again by God's will I came in contact with Prof. K. T. Pandurangi in 1955 when he was teaching Śrī Madhvācārya's *Brahmasūtrabhāṣya* to us - M.A. students at the Karnatak University, Dharwad. The seed sown by Dr. Sharma was made to sprout by Prof. Pandurangi. He remained goading me to undertake substantial work in Dvaita Vedānta. He has been to me since 1955 a real teacher-friend, philosopher and guide. It was he who assigned me this work of preparing the English translation and notes of the *Padārthasaṅgraha*.

I bow down to both Dr. Sharma and Prof. Pandurangi with prayers to be always showering their blessings on me.

After passing the S.S.C. Examination in 1951, I became an Arts student to become an advocate. But God had willed that I should become a Sanskrit teacher and God's will prevailed. I joined Karnatak Arts College, Dharwad in 1959 and served for ten years as a Sanskrit Lecturer Then in 1969, I moved on to P.G. Dept. of Sanskrit, Karnatak University, Dharwad where I served as Lecturer, Reader, Professor and Chairman of the Dept, until my retirement on 30th November 1993.

I decided to devote my retired life to bring out 'Multi-dimensional Contribution of Śrī Madhvācārya to Sanskrit Learning' and sent the project to the University Grants Commission, New Delhi, seeking financial assistance,

towards completing the project. I am happy that U.G.C. has sanctioned me financial assistance for three years. When I received the U. G. C. letter on 26th May 1994, I had to speed up my work on the *Padārthasaṅgraha* and by God's will again, I could complete it satisfactorily.

I am thankful to the U.G.C. authorities and also authorities of the Karnatak University Dharwad for allowing me to work in my own P.G. Dept. of Sanskrit.

The English translation has been literary and lucid. The Notes have been brief; just needful explanations have been given. As it is a primer, there is no discussion of differences from concepts and beliefs of other systems. Such discussions vindicating the categories and concepts of Dvaita Vedānta will be taken up in my future works.

The first verse of the *Padārthasaṅgraha* has been given with English translation separately as a dedication to the author Vedagarbha Padmanābhasūri. Really, he has contributed a commendable work to the Dvaita Vedanta Literature and he deserves this dedication.

I am thankful to Dr. M. B. Paraddi, Dr. (Miss) N. V. Koppal, Dr. B. A. Dodamani, Dr. M. N. Joshi, Dr. K. B. Archak and Vidwan Pandit Jayateerthacharya Malagi-all serving in the P.G. Dept. of Sanskrit, Karnatak University, Dharwad for their unstinted co-operation in my academic work.

I express my gratitude to the office-bearers of the Dvaita Vedānta Studies and Research Foundation, Bangalore for agreeing to include it among their publications.

I am grateful to the proprietor of Manohar Printing Press, Dharwad for completing the printing work at my convenience.

Lastly, God's grace, blessings of elders and good wishes of my well-wishers have been responsible for all my achievements. Hence I pray that all the three continue to be with me throughout my life bestowing success on my undertakings.

All comments on this work are cordially welcomed.

Dharwad **D. N. SHANBHAG**

CONTENTS

श्री वेदव्यासाय नमः

श्रीपद्मनाभ सूरि विरचितः

॥ मध्वसिद्धांतसारः ॥

(पदार्थसङ्ग्रहः)

१. द्रव्यनिरूपणम्

लक्ष्मीपतिं सम्प्रणम्य सर्वज्ञादिगुरूनपि।
पदार्थानां संग्रहोऽयं क्रियते शास्त्रतोऽञ्जसा॥

१. तत्र द्रव्यगुणकर्मसामान्यविशेषविशिष्टांशिशक्तिसादृश्याभावा दश पदार्थाः।

२. तत्र द्रव्याणि। परमात्मलक्ष्मीजीवाव्याकृताकाश-प्रकृतिगुणत्रयमहत्तत्त्वाहङ्कारतत्त्वबुद्धिमनइन्द्रियमात्राभूतब्रह्माण्डा-विद्यावर्णान्धकारवासनाकालप्रतिबिम्बभेदाद्विंशतिरेव।

३. रूपरसगन्धस्पर्शसङ्ख्यापरिमाणसंयोगविभागपरत्वापरत्वद्रवत्वगुरुत्वलघुत्वमृदुत्वकाठिन्यस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्न धर्माधर्मसंस्कारालोकशमदमकृपातितिक्षाबलभयलज्जागांभीर्यसौंदर्यधैर्यस्थैर्यशौर्यौदार्यसौभाग्यप्रभृतयोऽनेके गुणाः।

४. विहितनिषिद्धोदासीनभेदेन त्रिविधं कर्म। विहितमपि काम्याकाम्यभेदेन द्विविधम्। तच्च ब्रह्मादिसर्वजीवानाम्। लक्ष्मीनारा

यणयोस्तु लीलया मोहनाय वा। निषिद्धं कर्म रुद्रादीनाम्। उदासीनं कर्म तु परिस्पन्दः। स चोत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनागमन भ्रमणवमनवपनभोजनविदारणाद्यनेकविधः। यथायोगं चेतनाचेत नयोः धर्मः। पुनर्द्विविधः। नित्योऽनित्यश्च। नित्य ईश्वरादिचेतनस्व रूपभूतः। अनित्योऽनित्यगतः।

५. नित्यमनित्यं चेति सामान्यं द्विविधम्। प्रतिव्यक्त्यननुग तम्। पुनर्द्विविधम्। जातिरुपाधिश्चेति। जीवत्वादि यावद्वस्तुभावि नित्यम्। ब्राह्मणत्वमनुष्यत्वाद्ययावद्वस्तुभाव्यनित्यम्। सर्वज्ञत्व प्रमेयत्वाद्युपाधिरपि तद्वत्।

६. भेदाभावेऽपि भेदव्यवहारनिर्वाहका अनन्ता एव विशेषाः। सर्वपदार्थनिष्ठाः। स्वनिर्वाहकाश्च। ते द्विविधाः। नित्या अनित्याश्च। नित्या ईश्वरादिनित्यद्रव्यगताः। घटाद्यनित्यद्रव्यगता अनित्याः।

समवायस्तु स्वरूपत एव नास्ति।

७. विशेषणसम्बन्धेन विशेष्यस्य य आकारस्तद्विशिष्टम्। तद्विविधम्। नित्यमनित्यं च। नित्यं सार्वज्ञादिविशिष्टं परब्रह्मादि। द्वितीयं दण्डादिविशेषणसम्बन्धेन परिणतं दण्ड्यादि।

८. अंशी तु हस्तवितस्त्याद्यतिरिक्तः पटादिर्गगनादिश्चानुभव सिद्धः।

९. शक्तिश्चतुर्विधा। अचिन्त्यशक्तिराधेयशक्तिस्सहजशक्तिः

पदशक्तिश्चेति। तत्राचिन्त्यशक्तिः परमेश्वरे सम्पूर्णा। अन्यत्र यथायोग्या।

१०. कार्यमात्रानुकूला स्वभावरूपा सहजशक्तिः। सर्वपदार्थनिष्ठा। नित्यानित्यभेदेन द्विविधा। नित्यगता नित्या। अनित्यगता अनित्या।

अन्याहितशक्तिराधेयशक्तिः। सा च प्रतिष्ठादिना प्रतिमादौ।

पदपदार्थयोर्वाच्यवाचकभावसम्बन्धः पदशक्तिः। सा च स्वरध्वनिवर्णपदवाक्यमात्रगता। मुख्या परममुख्या चेति द्विविधा। सर्वशब्दानां परमात्मनि परममुख्यवृत्तिः। अन्यत्र मुख्यवृत्तिः।

११. सादृश्यं च पदार्थान्तरम्। न तु तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्। यमलादिषु नाना। एकनिरूपितमपरवृत्ति। न त्वनुगतम्। तद्द्विविधम्॥ नित्यमनित्यं चेति। नित्यगतं नित्यम्। अनित्यगतमनित्यम्।

१२. अभावश्चतुर्विधः। प्रागभावः प्रध्वंसाभावोन्योन्याभावोऽत्यन्ताभावश्चेति। कार्योत्पत्तेः प्राग्विद्यमानोऽभावः प्रागभावः। महदादिकार्यमात्रस्य। उत्पत्त्यनन्तरमेव विद्यमानोऽभावः प्रध्वंसः। सोऽपि कार्यमात्रस्य।

सार्वकालिकोऽभावोन्योन्याभावः। पदार्थस्वरूपमेव। नित्यात्मको नित्यः। अनित्यात्मकोऽनित्यः। भावाभावासत्प्रतियो

गिकश्च।

अप्रामाणिकप्रतियोगिकाभावोऽत्यन्ताभावः। न तु प्रामाणिक प्रतियोगिकः। स च नित्यः। घटाद्यभावस्तु यथायथं प्रागभावादिरूप एव।

१३. द्रवणप्राप्यत्वं द्रव्यसामान्यलक्षणम्। द्रवणं च गमनम्। उपादानकारणत्वं वा द्रव्यत्वम्। उपादानत्वं च परिणामोऽभिव्यक्ति श्चेति द्विविधम्।

१४. तत्र परमात्माऽनन्तगुणपरिपूर्णः। सृष्ट्याद्यष्टकर्ता। सर्वज्ञः। परममुख्यया वृत्त्या सकलशब्दवाच्यः। जडजीवप्रकृतिभ्योऽ त्यन्तविलक्षणः। ज्ञानानन्दाद्यात्मककल्याणविग्रहवान्। सर्वस्वतन्त्रः। एक एव। नानारूपः। सर्वाण्यपि रूपाणि पूर्णानि। स्वरूपगुणावयवक्रियादिभिरत्यन्ताभिन्नः।

१५. परमात्मभिन्ना तन्मात्राधीना लक्ष्मीः। परमात्मवन्नित्य मुक्ता तद्भार्या नानारूपा। परमात्मवज्जडदेहरहिता। तद्वत्सर्वशब्दवाच्या। देशकालाभ्यामेव परमात्मना समव्याप्ता।

१६. अज्ञानादिदोषयुक्ताः संसारिणो जीवाः। असङ्ख्याकाः। गणशोऽप्यनन्ताः। तेच त्रिविधाः। मुक्तियोग्या नित्यसंसारिणस्तमो योग्याश्चेति।

तत्र मुक्तियोग्याः पञ्चविधाः। देवर्षिपितृचक्रवर्तिमनुष्योत्तम

भेदात्। ब्रह्मवाय्वादयो देवाः। ऋषयो नारदाद्याः। पितरश्चिराः। रव्वम्बरीषादयश्चक्रवर्तिनः। मनुष्योत्तमास्तु द्विविधाः। चतुर्गुणोपासका एकगुणोपासकाश्चेति। तृणजीवा एकगुणोपासकाः। तद्व्यतिरिक्ताश्चतुर्गुणोपासकाः।

नित्यं सुखदुःखमिश्रा नित्यसंसारिणः। ते च मध्यममनुष्या एवासङ्ख्याताः। सर्वदा स्वर्गभूनिरयचारिणः। तमोयोग्यास्तु चतुर्विधाः। दैत्या राक्षसाः पिशाचा मनुष्याधमाश्चेति। सर्वेऽपि जीवाः परस्परं परमात्मना च भिन्नाः। संसारे मुक्तौ च तारतम्योपेताः। जीवाभिमानिनो ब्रह्मादयः।

१७. सृष्टिप्रलययोर्विकारशून्या दिगव्याकृताकाशम्। भूताकाशभिन्नम्। एकं नित्यं व्याप्तं स्वगतं च। प्राच्यादिस्वाभाविकावयवोपेतं च। तदभावे मूर्तं निबिडं जगत्स्यात्। लक्ष्मीस्तस्याभिमानिनी।

१८. साक्षात्परम्परया वा विश्वोपादानं प्रकृतिः। जडरूपा। नित्या व्याप्ता च। तदभिमानिनी रमा। सर्वजीवलिङ्गशरीररूपा तद्भिन्ना चेत्यनेकविधा।

१९. सत्त्वरजस्तमोनामकानां गुणानां समुदायो गुणत्रयम्। सृष्टिकाले मूलप्रकृतेस्सकाशात्परमात्मना त्रेधा भिन्नम्। महदादिजगदुपादानम्। तमोगुणापेक्षया रजोगुणो द्विगुणपरिमाणयुक्तः। रजोगुणापेक्षया सत्त्वगुणो द्विगुणपरिमाणयुक्तः। सत्त्वरजोभ्यां मिश्रं च तमः। तमस्सत्त्वाभ्यां मिश्रं च रजः। सत्त्वं तु शुद्धमेव। तत्र

शुद्धसत्त्वं मुक्तानां लीलाविग्रहाय भवति। रजोगुणेन सृष्टिः। रजोगुणस्थसत्त्वेन स्थितिः। तमोगुणेन विनाशः। सत्त्वाभिमानिनी श्रीः। रजोऽभिमानिनी भूः। तमोभिमानिनी दुर्गा रमैव। ब्रह्मादयोऽपि गुणत्रयाभिमानिनः।

२०. साक्षाद्गुणत्रयोपादानकं महत्तत्त्वम्। तमोगुणापेक्षया दशगुणपरिमाणन्यूनम्। ब्रह्मवायू तत्स्त्रियौ च तदभिमानिनः।

२१. महत्तत्त्वोपादानकमहङ्कारतत्वम्। वैकारिकतैजसतामस भेदेन त्रिविधम्। महत्तत्वाद्दशांशन्यूनम्। गरुडशेषरुद्रादयस्तद भिमानिनः।

२२. बुद्धिर्द्विविधा। तत्त्वरूपा ज्ञानरूपा चेति। तत्र तत्त्वरूपा द्रव्यम्। तत्त्वरूपा महत्तत्वजन्या। तैजसाहङ्कारेणोपचिता। ज्ञान रूपा बुद्धिर्ज्ञानप्रकरणे वक्ष्यते। ब्रह्माद्युमान्तास्तदभिमानिनः।

२३. मनो द्विविधं तत्वरूपं तद्भिन्नश्चेति। वैकारिकाहङ्कारो पादानकं मनस्तत्वम्। पूर्वोक्तदेवता इन्द्रकामानिरुद्धाश्च तदभिमानिनः।

तत्वभिन्नं मन इन्द्रियम्। तद्द्विविधम्। नित्यमनित्यं चेति। नित्येन्द्रियमीशलक्ष्मीब्रह्मादिसर्वजीवानां स्वरूपभूतम्। अनित्येन्द्रियं ब्रह्मादिसर्वजीवानां बाह्यम्। तत्पञ्चविधम्। मनोबुद्धिरहङ्कारः चित्तं चेतनेति।

२४. इन्द्रियाण्यपि द्विविधानि। तत्वभूतानि तत्त्वभिन्नानि चेति। पुनर्द्विविधानि ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि चेति। घ्राणरसन-चक्षुःश्रोत्रत्वग्रूपाणि ज्ञानेन्द्रियाणि पञ्च। वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाणि पञ्च। नित्यानित्यभेदेन पुनर्द्विविधानि। तत्र तत्वरूपा ण्यनित्यानि ज्ञानकर्मेन्द्रियाणि तैजसाहङ्कारोपादानकानि।

तत्वभिन्नानि नित्यानि ज्ञानकर्मेन्द्रियाणीशलक्ष्मीसर्वजीवानां स्वरू पभूतानि। तानि साक्षीत्युच्यन्ते। ईशलक्ष्म्योर्दशेन्द्रियाण्यपि प्रत्येकं गन्धादिसर्वपदार्थविषयकाणि। मुक्तानाममुक्तानां च ब्रह्मादीनामि न्द्रियाणि तत्तद्योग्यपदार्थविषयकाणि।

अनित्यानि तत्त्वभिन्नानि दशेन्द्रियाणि ब्रह्मादिसर्वजीवानाम्। ब्रह्मादयः सूर्यादयश्च तदभिमानिनः। संसारावस्थायामपि साक्षिस्व रूपेन्द्रियस्यात्मा मनस्तद्धर्माः सुखदुःखादयोऽविद्या कालोऽव्याकृ ताकाशश्च साक्षादेव विषयाः। बाह्येन्द्रियद्वारा शब्दादयोऽपि साक्षिविषयाः। ज्ञाततयाऽज्ञाततया सर्वेऽप्यतीन्द्रियाः साक्षिविष याः। साक्ष्यनङ्गीकारे कालाकाशाद्यसिद्धिप्रसङ्गात्।

२५. मीयन्त इति मात्राः शब्दस्पर्शरूपरसगन्धाः पञ्च विषयाः। ता द्विविधाः। तत्त्वरूपास्तद्भिन्नाश्चेति। तत्वरूपास्तामसा हङ्कारजन्याः पञ्चतन्मात्रा इत्युच्यन्ते। तत्वभिन्ना मात्रा गुणास्तत्प्रक रणे निरूप्यन्ते। उमासुपर्णीवारुण्यो बृहस्पत्याद्याश्च तदभिमानिनः।

२६. तद्द्वारा तामसाहङ्कारजन्यानि पञ्चभूतानि आकाशवायु-

तेजोप्पृथिव्यः। तानि द्विविधानि। तत्वभूतानि तद्भिन्नानि चेति। तत्र शब्दादाकाशोत्पत्तिः। तदभिमानी विनायकः। अंहकारतत्वाद् दशगुणन्यूनमाकाशम्।

२७. वायुर्द्विविधः। प्राणापानादिरूपस्तद्भिन्नश्चेति। पुनर्द्विविधः। नित्योऽनित्यश्च। नित्यः प्राणादिरीशलक्ष्म्योर्मुक्तानां च स्वरूपभूतः। अनित्यस्तत्त्वभिन्नः संसारिणाम्।

तत्वरूपो वायुः स्पर्शजन्यः। वाय्वादिदेवास्तदभिमानिनः। आकाशाद्दशगुणन्यूनः।

२८. तेजो द्विविधम्। तत्वरूपं तद्भिन्नं चेति। नित्यानित्यभेदेन पुनः द्विविधम्। नित्यं तेज ईशलक्ष्म्योर्मुक्तानां च स्वरूपभूतम्। तत्वरूपं तेजो रूपतन्मात्राजन्यमनित्यं च। वायुतत्वाद्दशगुण न्यूनम्। ब्रह्मादयो देवास्तदभिमानिनः।

२९. आपो द्विविधाः। तत्वभूतास्तद्भिन्नाश्चेति। पुनर्द्विविधा नित्या अनित्याश्च। तत्वभूता आपो रसजन्याः। तत्वभिन्ना आपो नित्याः। ईशलक्ष्मीमुक्तस्वरूपभूताः। ब्रह्मादयो देवा अबभिमानिनः। तेजसो दशगुणान्यूनाः।

३०. पृथिवी द्विविधा तत्वातत्वभेदात्। पुनर्द्विविधा नित्या नित्या चेति। अनित्या तत्वरूपा पृथिवी गन्धजन्या। नित्या तत्वभिन्ना ईशलक्ष्मीमुक्तस्वरूपभूता। ब्रह्मादयो धरा च तदभिमानिनः। अद्भिर्दशांशन्यूना। ब्रह्माण्डाद्विगुणपरिमाणा।

अव्यक्तमारभ्य पृथिवीतत्वपर्यन्तानि ब्रह्माण्डाद्बाह्यानि तदावरणानि। तत्वभिन्नान्याकाशादिपञ्चभूतानि ब्रह्माण्डान्तर्गतानि परमात्मजन्यानि।

महदाद्यनङ्गीकारे ब्रह्माण्डोत्पत्तिर्न स्यात्। तत्तद्देवानामंशिनामवस्थानानि न स्युः। तत्तत्तत्वपर्यन्तव्याप्तभगवद्रूपापरोक्षज्ञानं च देवानां न स्यात्। तत्तत्प्रतिपादकप्रमाणविरोधश्च स्यात्।

३१. एतैस्तत्वैर्विष्णुर्वीर्यात्मना परिणाम्यब्रह्माण्डमसृजत्।

तच्च पञ्चाशत्कोटिविस्तीर्णम्। एकमेव कपालद्वयम्। उपरितनं कपालं सुवर्णम्। अधस्तनं रजतम्। कूर्मरूपेण हरिणा वायुना च धृतम्। सर्वप्राणिनां चतुर्दशलोकानां चावासस्थानम्। सन्धिदेशे क्षुरधारोपम सुषिरयुक्तम्। तदभिमानी चतुर्मुखः।

ततो भगवान्महदादितत्वांशान् स्वोदरे निक्षिप्य ब्रह्माण्डान्तः प्रविवेश। तदोदके शयानस्य भगवतो नाभेः पद्ममभूत्। पद्मे च चतुर्मुखोऽजनि। तस्मात्पुनर्देवादयो मन आदीनि जातानि।

३२. ततोऽविद्योत्पन्ना। सा च पाञ्चपर्वणी। पञ्च पर्वाणि तु मोहो महामोहस्तामिस्रमन्धतामिस्रं तमश्चेति। पुनर्जीवाच्छादिका परमाच्छादिका शैवला माया चेति चतुर्विधा। सर्वाप्यविद्या जीवाश्रिता। प्रातिस्विकी च।

३३. वर्णा अकारादय एकपञ्चाशत्। सर्वे लौकिका वैदिकाश्च

शब्दा एकपञ्चाशद्वर्णात्मकाः प्रत्येकं व्याप्ता अनादिनित्याश्च। उच्चारणध्वनिर्व्यंग्याः। प्रत्येकमानुपूर्वीविशेषविशिष्टतया च पदार्थ वाचकाः।

३४. प्रकाशविनाश्योऽधकारः। न तु तेजोऽभावः। चक्रादि च्छेद्यत्वात्। ब्रह्मणा पीयमानत्वादावरणत्वात्स्वातन्त्र्येणोपलभ्यमान त्वाच्च।

३५. स्वाप्नपदार्थोपादानानि वासनाः। पूर्वानुभवजन्याः मनोगताः। प्रवाहतोऽनादयः। संस्कारपदवाच्याः।

३६. आयुर्व्यवस्थापकः कालः। क्षणलवाद्यनेकरूपः। प्रत्येकं व्याप्तः। प्रकृत्योत्पत्तिविनाशवान्। स्वगतः। सर्वाधारश्च। कालप्रवाहस्तु नित्यः। सर्वकार्योत्पत्तिहेतुः।

३७. प्रतिबिम्बस्तु बिम्बाविनाभूतस्तत्सदृशः। स च द्विविधः। नित्योऽनित्यश्च। परमात्मव्यतिरिक्ताः सर्वेऽपि चेतनाः परमात्मप्रतिबिम्बा नित्याः। नित्या नित्योपाधियुक्ताः। स्वापेक्षयोत्त मोत्तमप्रतिबिम्बाश्च। दर्पणादौ मुखादिप्रतिबिम्बा अनित्याः। दर्पणा द्युपाध्युपादानकाः। न तु बिम्बात्मकाः। आभिमुख्यादिविरुद्धधर्मा धिकरणत्वात्। छायापि प्रतिबिम्बभूतैव। न त्वन्या आलोकोपादानभूता। क्वचिच्चेतनेऽपि छायाशब्दप्रयोगः प्रतिबिम्बत्व साम्याद्भवतीति।

२. गुणनिरूपणम्

१. दोषभिन्नत्वं गुणत्वम्। शुक्लादिव्यवहारहेतुर्गुणो रूपम्। तच्च शुक्लनीलपीतरक्तहरितकपिलचित्रभेदात्सप्तविधम्। पुनर्द्विविधम्। नित्यमनित्यं च। पुनर्द्विविधम्। उद्भूतमनुद्भूतं च। तत्र शुक्लनीलपीतरक्तादिसप्तान्यपि नित्यानि रूपाणि परमात्मनः। तद्वल्लक्ष्म्या अपि रूपाणि। सर्वाण्यप्युद्भूतरूपाणि नित्यानि सर्वजीवानाम्। प्रकृतेः शुक्लरक्तनीलानि नित्यानि त्रीणि। तद्वद्गुणत्रयस्यापि। महत्तत्वस्य हेमवद्रूपम्। अहङ्कारादौ तु रूपवद्द्रव्यारब्धत्वाद्रूपं सम्भावितम्। भूतेषु तेजोजलपृथिवीष्वनित्यानि रूपाण्युद्भूतानि। आकाशे त्वनुद्भूतम्। तत्र पृथिव्यां सप्तविधम्। शुक्लं जले। शुक्लभास्वरं तेजसि। नीलमाकाशतमसोः। सर्वाण्यपि रूपाणि वासनाप्रतिबिम्बयोश्च।

२. माधुर्यादिव्यवहारहेतुर्गुणो रसः। स च षड्विधः। मधुराम्ललवणकटुकषायतिक्तभेदात्। रूपवन्नित्यानित्यविभागवान्। ईशलक्ष्म्यो र्मधुररसः। पृथिव्यां वासनायां च षड्रसाः। जले तु मधुर एव।

३. सुरभ्यादिव्यवहारहेतुर्गुणो गन्धः। स च द्विविधः सुरभिरसुरभिश्चेति। पूर्ववन्नित्यानित्यविभागवान्। ईशलक्ष्मीमुक्तानां सुगन्ध एव। पृथिव्यां वासनायां च द्विविधोऽपि।

४. शीतादिव्यवहारहेतुर्गुणः स्पर्शः। स त्रिविधः। शीतोष्णानुष्णाशीतस्पर्शभेदात्। पूर्वोक्तविभागयुक्तः। तत्र हरौ लक्ष्म्यां च त्रिविधोऽपि नित्यश्च। शीतं जले। उष्णं तेजसि कालकूटविषेऽपरोक्षज्ञाने च।

५. एकत्वादिव्यवहारहेतुस्सङ्ख्या। एकत्वं द्विविधम्। नित्यमनित्यं चेति। नित्यगतं नित्यम्। अनित्यगतमनित्यम्। द्वित्वत्रित्वादिकं च सर्वत्रापेक्षाबुद्धिजन्यमनित्यमेव। एकत्वाद्यनन्तपर्यन्ता। सर्वपदार्थवृत्तिः।

६. अणुत्वादिहेतुर्गुणः परिमाणम्। तत् त्रिविधम्। अणुमहन्मध्यमं चेति। नित्यं त्रिविधमपि परिमाणमीशलक्ष्म्योर्युगपदेव। नित्यमणुपरिमाणं सर्वजीवेषु। अनित्यमणुपरिमाणमनित्यगतम्। नित्यं महत्परिमाणमव्याकृताकाशप्रकृतिवर्णगतम्। काले क्षणलवादिरूपेऽनित्यं महत्परिमाणम्। कार्यद्रव्येषु सर्वत्र मध्यमपरिमाणमनित्यमेव। मुक्तानां महत्तत्त्वादिकमणिमाद्यष्टैश्वर्यरूपम्।

७. संयुक्तव्यवहारहेतुर्गुणः संयोगः। स द्विविधः नित्योऽनित्यश्च। ईशलक्ष्म्योरीशजीवयोर्वर्णाव्याकृताकाशयोर्वर्णानां च परस्परं संयोगो नित्य एव। अनित्यनित्यद्रव्ययोरनित्यानां च परस्परं संयोगोऽनित्य एव। उभयोस्संयोगस्तु नैकः। किं तु भिन्नभिन्न एव। अनित्यसंयोग एकविध एव। अन्यतरकर्मजः। मल्लयोस्संयोगस्तु नैकः। किं तु द्वौ। अतोऽन्यतरकर्मजौ। स्थाणुश्येनसंयोगवत्। संयोगजसंयोगस्तु नास्त्येव। हस्तशरीरयोरभेदेन हस्तपुस्तकसंयोगेन संयोगान्तरोत्पत्तेरयोगात्।

८. विभक्तव्यवहारहेतुर्गुणो विभागः। स द्विविधः। नित्योऽनित्यश्च। अनित्यद्रव्यगतोऽनित्यः। भगवद्रूपाणां परस्परं मूलरूपाणां

च विश्लेषशब्दवाच्यो विभागो नित्यः। संश्लेषवदचिन्त्यशक्त्या घटनीयः।

९. परापरव्यवहारकारणे परत्वापरत्वे। ते प्रत्येकं द्विविधे। कालपरत्वापरत्वे देशपरत्वापरत्वे चेति। पुनर्द्विविधे। नित्येऽनित्ये चेति। नित्ये देशकालपरत्वे उभे अपीशलक्ष्मीजीवेषु। नित्यं कालपरत्वमव्याकृताकाशादिनित्यद्रव्येषु। अनित्यं कालपरत्वं ज्येष्ठे। अनित्यं कालापरत्वं कनिष्ठे। अनित्यं दैशपरत्वं दूरस्थेऽनित्यद्रव्ये। नित्यं देशापरत्वमीशलक्ष्म्योः। अनित्यं देशापरत्वं समीपस्थे वस्तुनि।

१०. द्रवणहेतुर्गुणो द्रवत्वम्। तत् द्विविधम्। नित्यमनित्यं चेति। पुनर्द्विविधम्। सांसिद्धिकं नैमित्तिकं च। सांसिद्धिकं नित्यं द्रवत्वमीशलक्ष्म्योर्देवेषु जलान्तर्गतेषु। अनित्यं सांसिद्धिकं जले। नैमित्तिकं द्रवत्वं घृतसुवर्णादौ।

११. पतनासाधारणकारणं गुरुत्वम्। नित्यमनित्यं चेति द्विविधम्। नित्यं गुरुत्वमीशलक्ष्म्योः। कृष्णे यशोदाप्रत्यक्षसिद्धम्। योगिनां मुक्तानां च गुरुत्वमष्टैश्वर्यांतर्गतम्। अनित्यं गुरुत्वं पाषाणादौ कार्यद्रव्यमात्रे। पञ्चतन्मात्रावाय्वाकाशतमस्सु न गुरुत्वम्।

१२. वेगहेतुर्गुणो लघुत्वम्। तद्विविधम्। नित्यमनित्यं च। नित्यं लघुत्वमव्याकृताकाशवर्णव्यतिरिक्तेशादिद्रव्यवृत्ति। अनित्यं लघुत्वमनित्यद्रव्यवृत्ति। वेगहेतुत्वं च लघुत्वस्य लाघवातिशयेन

वेगातिशय दर्शनात्तेज आदौ प्रत्यक्षसिद्धम्। गुरुत्वाभावो लघुत्वमिति च वैपरीत्यपराहतम्। प्रतियोग्यनपेक्षणाच्च।

१३. मार्दवव्यवहारहेतुर्मृदुत्वम्। नित्यानित्यभेदेन द्विविधम्। नित्यमीशलक्ष्मीमुक्तेषु। अनित्यं मृदुत्वमाकाशकालाविद्यांधकारतेजोवायुव्यतिरिक्तेषु कार्यद्रव्येषु।

१४. काठिन्यं द्विविधम्। नित्यमनित्यं च। नित्यमीशलक्ष्म्योः। अनित्यमनित्यमूर्तद्रव्ये। न च काठिन्यं निबिडावयवसंयोगो न गुणान्तरमिति वाच्यम्। सम्बन्धिद्वयप्रतीतिं विनापीदं कठिनमिति प्रतीतेः। अन्यथा गुरुत्वमपि गुणान्तरं न स्यात्। अन्योन्याभावातिरिक्तं पृथक्त्वं नास्त्येव।

१५. स्नेहो द्विविधः। मनःप्रावण्यं चूर्णादिपिण्डीभावहेतुश्चेति। उभयमपि नित्यानित्यभेदेन द्विविधम्। आद्यं मनःप्रावण्यं चैतन्यमात्रे। अनित्यं मनःप्रावण्यं संसारिषु। नित्यश्चूर्णादिपिण्डीभावहेतुरीशलक्ष्म्योः। अनित्यस्तु जलमात्रवर्ती।

१६. शब्दस्तु ध्वनिः। नित्यानित्यभेदेन द्विविधः। नित्य ईशलक्ष्मीमुक्तप्राप्तान्धतमसाम्। अनित्यस्त्वव्याकृताकाशाविद्यान्धकारवर्णव्यतिरिक्तेषु सर्वत्र। आकाशमात्रगुण इति च न युक्तम्। पूर्वपूर्वगुणानामुत्तरोत्तरेषु भूतेष्वनुवृत्तेर्भागवतादावुक्तेः। अनुभवाच्च।

१७. बुद्धिर्ज्ञानम्। सर्वव्यवहारहेतुर्गुणः। तच्च ज्ञानं द्विविधम्।

नित्यमनित्यं च। पुनर्द्विविधम्। यथार्थमयथार्थं च। तत्र यथार्थं नित्यज्ञानमीशलक्ष्मीसज्जीवस्वरूपम्। अयथार्थं नित्यं ज्ञानमसज्जीव स्वरूपम्। अनित्यं यथार्थज्ञानं ब्रह्मादिसर्वजीवानाम्। अनित्यमयथा र्थज्ञानं रुद्रादिसर्वजीवानाम्। ब्रह्मवाय्वोः सरस्वतीभारत्योश्च नायथा र्थज्ञानम्। पुनर्ज्ञानं द्विविधम्। अनुभवःस्मृतिश्चेति। ईशलक्ष्मीमुक्ता नामनुभव एव। न तु संस्कारजन्या स्मृतिः। स्मृतिर्ब्रह्मादिसर्व-जीवानाम्।

१८. अनुभवस्त्रिविधः। प्रत्यक्षानुमितिशब्दभेदात्। ईश लक्ष्म्योः प्रत्यक्षरूपमेव ज्ञानं न त्वनुमितिर्न वा शाब्दम्। ब्रह्मादीनां तु त्रिविधमपि ज्ञानम्।

१९. सर्वैरनुकूलतया वेदनीयं सुखम्। तद्विविधम्। नित्यम नित्यं च। नित्यमीशलक्ष्मीसज्जीवस्वरूपम्। अनित्यं सुखं ब्रह्मादि सर्वजीवानां संसारावस्थायामेव। उभयमपि ज्ञानवद् बहुतारतम्योपेतम्। नित्यसंसारिणां तु दुःखमिश्रं सुखम्। तमोयोग्या नामनित्यं सुखं संसारावस्थायामेव। तारतम्योपेतम्।

२०. प्रतिकूलतया वेदनीयं दुःखम्। तदपि नित्यानित्यभेदेन द्विविधम्। नित्यं दुःखं तमोयोग्यानां स्वरूपं तारतम्योपेतम्। नित्यसंसारिणां सुखमिश्रं दुःखं स्वरूपभूतम्। अनित्यं दुःखं सर्वजीवानाम्।

२१. काम इच्छा। सा द्विविधा। नित्यानित्यभेदात्। दुष्टादुष्टभे

देन पुनर्द्विविधा। तत्रादुष्टनित्येच्छा ईशलक्ष्मीसज्जीवस्वरूपभूता। अदुष्टाऽनित्येच्छा सर्वजीवानां संसारे। नित्यदुष्टेच्छा तमोयोग्यस्वरूपा। अनित्यदुष्टेच्छा रुद्रादि सर्वजीवानाम्। ब्रह्मवायुतत्स्त्रीणां तु नासद्विषयेच्छा।

२२. क्रोधो द्वेषः। स द्विविधः। नित्यानित्यभेदात्। नित्यः क्रोध ईशलक्ष्मीसर्वजीवानां स्वरूपम्। अनित्यः संसारिजीवानां बाह्यः।

२३. प्रवृत्तिः प्रयत्नः। नित्यानित्यभेदात्सोऽपि द्विविधः। नित्यः प्रयत्न ईशलक्ष्मीसर्वजीवानां स्वरूपम्। अनित्यः प्रयत्नः संसारिणाम्। बुद्ध्यादिप्रयत्नान्तं मनोधर्म एव एवानित्यम्। तत्स्वामित्वात्तदनुभवितृत्वाज्जीवस्य।

२४. धर्माधर्मौ पुण्यपापे। नित्यानित्यभेदेन तौ द्विविधौ। पुनर्द्विविधौ। अल्पमहद्भेदात्। अनित्यौ द्विविधौ। काम्यकर्मजाकाम्यकर्मजभेदात्। तत्रेशलक्ष्म्योः पुण्यपापसम्बन्ध एव नास्ति। नित्यं पुण्यं ब्रह्मादिसज्जीवस्वरूपम्। ज्ञानोत्तरभाविसत्कर्मणाऽभिव्यज्यते। मोक्षे आनन्दातिशयहेतुः। अनित्यं पुण्यं सर्वजीवानां बाह्यम्। काम्यकर्मजमकाम्यकर्मजं च। ज्ञानात्पूर्वभाव्यकाम्यकर्मजं पुण्यमपरोक्षज्ञानहेतुरन्तःकरणशुद्धिद्वारा। काम्यकर्मजं पुण्यमनित्यं स्वर्गादि काम्यफलहेतुः। पुनरनित्यं द्विविधम्। इष्टानिष्टभेदात्। अनिष्टपुण्यस्य कस्यचिद्भोगेन नाशः। कस्यचिदपरोक्षज्ञानेन नाशः।

इष्टपुण्यस्य न ज्ञानेन नाशः। ज्ञानोत्तरं मोक्षे वा भोगानुकूलम्। पुनः- काम्यपुण्यं द्विविधम्। प्रारब्धम् अप्रारब्धं चेति। भोक्तुमारब्धं प्रारब्धम्। सञ्चितं भोक्तव्यमप्रारब्धम्। महतः प्रारब्धस्य पुण्यस्य भोगेनैव नाशः। ब्रह्मादिसज्जीवानाम् अल्पस्य प्रारब्धस्य ज्ञानेन विनाशः।

पापप्रारब्धस्यापि भोगेन नाशो रुद्रादि सर्वजीवानाम्। नित्यं पापमीषद्रुद्रादि सज्जीवस्वरूपम्। तच्च श्रेष्ठापराधादपरोक्षज्ञानानन्तर मभिव्यज्यते। मुक्तावधिकानन्दस्य प्राप्तव्यस्य ह्रासकारणं देवानाम्। मनुष्योत्तमानान्तु क्लृप्तानन्दस्यैव ह्रासकारणम्।

नित्यं महत्पापं तमोयोग्यस्वरूपम्। तमस्साधनम्। अनित्यं पापं भगवद्द्वेषपरिपाकहेतुः। द्वेषपरिपाकानन्तरं च कृतं पापं तमसि दुःखातिशयहेतुः।

तेषामनित्यपुण्यमैहिकपुरुषार्थहेतुः। न तु स्वर्गादिपारलौकि कसुखहेतुः। द्वेषपरिपाकेन च संचितस्येष्टपुण्यस्य सर्वस्यापि विना शः। अनिष्टपुण्यस्याविनाशः। अनिष्टपापस्य तु तमस्यनुस्यूतिः। प्रारब्धपुण्यपापयोस्तु भोगेनैव विनाशः। एतयोरेवादृष्टमिति नाम। तच्च कार्यमात्रं प्रतिकारणम्।

२५. संस्कारश्चतुर्विधः। वेगो भावना योग्यता स्थिति-स्थापकश्चेति। धावनादिक्रियाहेतुर्गुणो वेगः। स द्विविधः। नित्योऽनि

त्यश्च। नित्य ईशलक्ष्मीप्रकृतिजीवस्वरूपभूतः। अनित्यो वेगोऽव्याकृताकाशवर्णव्यतिरिक्तेषु सर्वद्रव्येषु। अनुभवजन्यः स्मृतिहेतुस्संस्कारो भावना। अनित्यैव। ईशलक्ष्मीमुक्तानां स्मरणाभावान्न भावना। हठाख्ययोग्यता अनादिरूपा। मोक्षतमसोस्तत्साधनानां तारतम्यस्य च व्यवस्थापिका। अन्यथा साङ्कर्यात्। सा ब्रह्मादिसर्वजीवानां स्वरूपभूतैव। पूर्वावस्थापादकः स्थितस्थापकः। नित्योऽनित्यश्चेति द्विविधः। नित्य ईशलक्ष्म्यादिस्वरूपभूतः। अनित्यः कटधनुरादिवर्ती।

२६. रूपादिज्ञानहेतुरालोकः। स द्विविधः नित्योऽनित्यश्च। नित्य ईशलक्ष्मीमुक्तजीवानां स्वरूपम्। अनित्यो नित्यतेजोमात्रवृत्तिः। दीपेनैव सह गमनागमनरूपानुविधाना- द्गुणत्वम्।

२७. शमो बुद्धेर्भगवन्निष्ठता। नित्यानित्यभेदेन द्विविधः। नित्य ईशलक्ष्मीब्रह्मादिसज्जीवस्वरूपभूतः। अनित्यः सकलजीवानां बाह्यः।

२८. इन्द्रियनिग्रहो दमः। नित्यानित्यभेदेन द्विविधःशमवत्।

२९. कृपा दया। नित्यानित्यभेदेन सापि द्विविधा। नित्या ईशलक्ष्मीसज्जीवस्वरूपभूता। अनित्या सर्वजीवानाम्। सुखदुःखादि द्वन्द्वसहिष्णुता तितिक्षा। कृपावन्नित्यानित्या च।

३०. परापेक्षां विन कार्यानुकूलगुणो बलम्। तद्विविधम्।

नित्यानित्यभेदात्। नित्यं बलं चेतनमात्रस्य। अनित्यं संसारिणां बाह्यम्।

३१. भयं नित्यानित्यभेदेन द्विविधम्। नित्यं भयं दैत्यस्वरूप भूतम्। अनित्यं भयं ब्रह्मादिसर्वजीवानां बाह्यम्।

३२. लज्जापि स्वरूपास्वरूपभेदेन द्विविधा। स्वरूपभूता लज्जा लक्ष्म्यादीनामपि। अनित्या संसारिणाम्। गाम्भीर्यादीनि सौन्दर्यान्तानि द्विविधानि पूर्ववज्ज्ञेयानि। प्रभृतिशब्देन शब्दादयो ग्राह्याः। रूपरसगन्धस्पर्शशब्दाः पृथिव्यां पाकजा अपाकजाश्च। अन्यत्रापाकजाः।

३. प्रमाणानि

१. कारणं द्विविधम्। उपादानकारणमपादानकारणं चेति। परिणामिकारणमेवोपादानकारणम्। अपादानकारणमेव निमित्तकारणमित्युच्यते। कार्यं सदसदात्मकम्। उत्पत्तेः पूर्वं कारणात्मना सत् कार्यात्मनाऽसच्च। उत्पत्त्यनन्तरं कार्यात्मना सत् कारणात्मनाऽसच्च। उपादानोपादेययोर्भेदाभेदौ। यावद्द्रव्यभाविनां गुणक्रियाजातीनां गुण्यादिभिरत्यंताभेद एव। अयावद्द्रव्यभाविनां तु भेदाभेदौ। उपादानगता एव गुणाः कार्यगाः।

२. ज्ञानोत्पत्तिक्रमस्तु आत्मा मनसा संयुज्यते। मन इन्द्रियेणे

न्द्रियमर्थेन। ततोऽतःकरणमेव ज्ञानात्मना परिणमते। ज्ञानादिच्छा। इच्छातः प्रवृत्तिः। अपरोक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षस्संयोग एव। गुणादिभिरपीन्द्रियस्य संयोग एव। ज्ञानविषययोस्तु विषयविषयिभावः। अन्तःकरणस्थितस्य ज्ञानस्य बाह्यघटादिना संयोगाभावात्।

३. ज्ञानकरणं त्रिविधम्। प्रत्यक्षानुमानशब्दभेदात्। तत्र यथार्थज्ञानकरणानि प्रमाणानि। अयथार्थज्ञानकरणान्यप्रमाणानि। यथार्थज्ञानमपि प्रमाणम्। स्वरूपेन्द्रियं साक्ष्यपि प्रत्यक्षरूपं प्रमाणम्। इन्द्रियार्थसन्निकर्षद्वारा चक्षुरादिषडिन्द्रियाणि ज्ञानजनकानि। संस्कारद्वारा मनःस्मरणसाधनम्। यथार्थस्मृतिरपि प्रमाणम्। दोषसहकारेणेन्द्रियाण्ययथार्थज्ञानजनकानि। व्याप्तिज्ञानं समुचितदेशादौ सिद्धिश्चानुमानसहकारि। न तु पक्षधर्मताज्ञाननियमः।

४. शक्तिज्ञानमाकाङ्क्षासत्त्योश्च ज्ञानं शाब्दज्ञानकारणम्। न तु योग्यताज्ञानमपि। अत्यन्तासत्यप्यर्थे शब्दस्य ज्ञानजनकत्वदर्शनात्। स्वातन्त्र्येण पदार्थस्मरणं न हेतुः। शक्तिज्ञान एवान्तर्भूतत्वात्।

साहचर्यनियमो व्याप्तिः। पदपदार्थयोर्वाच्यवाचकभावसम्बन्धः शक्तिः। तद्ग्रहश्च सादृश्यपुरस्कारेण सर्वधूमाग्न्योः सर्वपदार्थयोश्च भवति। न तु सामान्यप्रत्यासत्त्या।

प्रत्यक्षादिजन्यं ज्ञानं सविकल्पकमेव। न तु निर्विकल्पकम्। मानाभावात्।

५. प्रत्यक्षप्रमाणमष्टविधम्। साक्षिषडिन्द्रिययथार्थ-ज्ञानभेदात्।

६. अनुमानं त्रिविधम्। केवलान्वयि केवलव्यतिरेक्यन्वयव्यतिरेकिभेदात्। अन्वयसहचारमात्रग्राह्यव्याप्तिकं केवलान्वयि। स्वातन्त्र्येणानुमितिहेतुः। व्यतिरेकसहचारमात्रग्राह्यव्याप्तिकं केवलव्यतिरेकि। व्यतिरेकव्याप्तिज्ञानमन्वयव्याप्तिज्ञांनद्वारानुमितिहेतुः। न तु साक्षात्। व्यधिकरणत्वाद्व्यतिरेकव्याप्तेः। उभय सहचारग्राह्यव्याप्तिकमन्वयव्यतिरेकि। अत्राप्यन्वयव्याप्तिज्ञानमेवानुमितिहेतुः। व्याप्तिज्ञानकारणभेदाद्भेदः। स्वार्थं परार्थं चेति पुनर्द्विविधमनुमानम्। स्वार्थं स्वानुमितिहेतुः। परानुमितिहेतुः परार्थम्। यावता विना नानुमितिस्तावदवयवाः प्रयोक्तव्याः। न तु पञ्चावयवनियमः।

७. आगमो द्विविधः। पौरुषेयापौरुषेयभेदात्। पौरुषेय आप्तोक्त एव प्रमाणम्। वक्तुराप्तता च विवक्षितार्थतत्त्वज्ञानम्। भ्रमप्रमादविप्रलिप्साकरणापाटवादिशून्यत्वं च। वेदानुसारित्वं वा। यथा भारतादि।

अपौरुषेयस्तु सर्वोऽपि वेदः प्रमाणम्। वेदापौरुषेयत्वं च वेदेनैव सिद्धम्। उपक्रमादिषड्विधतात्पर्यलिङ्गैर्निर्णीतार्थक एव वेदः प्रमापकः। अन्यथा भ्रमजनकः।

८. वेदार्थस्त्रिविधः। परमात्मा ब्रह्मादिदेवास्तदन्तर्गतभगवद्रूपाणि चेति। परममुख्यया वृत्त्या परमात्मप्रतिपादकः। तदन्यप्रति

पादकता च मुख्यया लक्षणया गौण्योपचारेण रूढोपचारेण रूढलक्षणया चेति।

मुख्यवृत्तिरपि त्रिविधा। योगो रूढिर्योगरूढिश्चेति। प्रयोगबाहुल्यमात्रं रूढिः। यथा गोघटादिशब्दानां गोघटादिषु। अवयववृत्तिः योगः। यथा पाचकादिशब्दानां देवदत्तादौ। तदुभयं योगरूढिः। यथा पङ्कजादिशब्दानां पद्मादौ। मुख्यान्वयानुपपत्तिपूर्वकं मुख्यसम्बन्धवति वृत्तिर्लक्षणा। यथा गङ्गायां घोष इत्यत्र गङ्गापदस्य तीरे। मुख्यार्थसादृश्यवति वृत्तिर्गौणी। यथाग्निशब्दस्य माणवके। उपचारमात्रं यथा। चित्रलिखितसिंहादौ सिंहशब्दस्य। तत्र प्रयोगबाहुल्यं चेद्रूढोपचारः। यथा तप्तायःपिण्डे दग्धृशब्दस्य। रूढलक्षणा यथा। मार्गाश्चलन्तीत्यादौ मार्गादिशब्दानां तत्स्थे।

लक्षणापि त्रिविधा। जहदजहल्लक्षितलक्षणाभेदात्। मुख्यार्थपरित्यागो यत्र तत्र जहल्लक्षणा। गङ्गापदस्य तीरे। मुख्यार्थस्यापरित्यागो यत्र तत्राजहल्लक्षणा। छत्रिपदस्याच्छत्रिष्वपि। लक्ष्यं सम्बन्धीकृत्य तत्सम्बन्धिनि वृत्तिर्लक्षितलक्षणा। एकीभवन्तीत्यादौ च्विप्रत्ययस्य मत्यैक्यद्वारा मतिमत्सु। एता वृत्तयो जगति।

परमात्मनि महायोगो महारूढिश्च। इन्द्रादिजगद्वाचिशब्दानां परमात्मनि महायोगः। योगार्थस्यैश्वर्यादेः परमात्मनि निरवधिकत्वात्। इन्द्रादिगताल्पैश्वर्यस्यापि परमात्माधीनत्वाच्च। नारायणादिशब्दानां महायोगरूढिः।

९. शक्तिश्च योग्येतरान्वितस्वार्थे व्यक्तावेव। न तु जातिविशिष्टे। गौरवात्। जातिभानं चाविनाभावात्। अन्वयबोधश्च क्वचित्पदाध्याहारेण क्वचिदावृत्त्या क्वचित्तात्पर्यात्।

१०. विधिना प्रवर्तकं ज्ञानम्। निषेधेन निवर्तकं ज्ञानम्। विध्यर्थश्च बलवदनिष्टाननुबन्धित्वं कृतिसाध्यत्वम् इष्टसाधनत्वं च। न तु कार्यमपूर्वम्। तस्य कल्प्यत्वात्। तच्चापूर्वं फलसमानाधिकरणम्। न तु कृतिसमानाधिकरणम्। श्येनेनाभिचरन्यजेतेत्यादौ विधेरिष्टसाधनत्वे न लक्षणा। तस्य नरकादिबलवदनिष्टानुबन्धित्वात्। बलवदनिष्टानुबन्धित्वमिष्टसाधनत्वाभावश्च निषेधार्थः।

११. अपभ्रंशानां तु न शक्तिः। किं तु शक्तिभ्रमादाधुनिकसङ्केताद्वार्थ बोधः। वैदिकाश्शब्दाःऽसाधवः। अपभ्रंशाश्चासाधवः। व्याकरणव्युत्पाद्यत्वं साधुत्वम्। तदभावोऽसाधुत्वम्।

१२. प्रमाणानां प्रामाण्यस्योत्पत्तौ ज्ञप्तौ च स्वतस्त्वम्। ज्ञानकारणमात्रजन्यत्वमुत्पत्तौ स्वतस्त्वम्। ज्ञानग्राहकसाक्षिग्राह्यत्वनैयत्यं ज्ञप्तौ स्वतस्त्वम्। अन्यथाऽनवस्थानात्। स्वतस्त्वे संशयानुपपत्तिर्बाधिकेति चेन्न। स्वतस्त्वस्यौत्सर्गिकत्वात्। बाधके सति साक्षी प्रामाण्यं न गृह्णातीत्यभ्युपगमात्। अप्रामाण्यं च परतो ज्ञायते। उत्पद्यते चेति।

४. सृष्ट्याद्यष्टकर्तृत्वनिरूपणम्

१. एवं पदार्थे निरूपिते तत्सृष्ट्यादिकर्तृत्वेन भगवज्ज्ञानं मोक्षसाधनमिति सृष्ट्यादिकं निरूप्यते। परमात्मनः प्रलयान्ते सिसृक्षा भवति। ततः प्रकृतिं प्रविश्य क्षोभयति। ततो गुणत्रयात्मना विभजति। ततो महदाद्यण्डपर्यन्तं तत्त्वानि तदभिमानिब्रह्मादिदेवांश्च सृजति। ततश्चेतनाचेतनानामंशानुदरे निक्षिप्य ब्रह्माण्डं प्रविशति। ततो दिव्यवर्षसहस्रान्ते स्वनाभितः पद्मं जनयति। तच्च पद्मम् आद्यब्रह्मणः प्रथमपरार्धान्ते जायते। तत्पद्मे चतुर्मुखोऽजनि। चतुर्मुखो जगत्सृष्टौ साधनास्मृत्या दिव्यवर्षसहस्रपर्यन्तं तपः करोति। तत्तपसा प्रसन्नो भगवान् स्वदेहतः पञ्चभूतानि सृजति। ततश्चतुर्मुखान्तर्गतस्संस्तन्नामको भूत्वा पञ्चभूतैः पद्मदलैश्चतुर्दशभुवनानि सृजति। पुनः सर्वे देवा अण्डान्तर्जायन्ते।

२. लक्ष्म्यादिनित्यानामपि पराधीनविशेषावाप्ति लक्षणोत्पत्तिः। ब्रह्मणः प्रतिदिनं भूर्भुवःस्वरिति लोकत्रयस्य सृष्टिविनाशौ। चतुर्युगसहस्राणि ब्रह्मण एकं दिनम्। तत्र चतुर्दशमन्वन्तराणि। एकैकस्य मनोः सार्धाष्टादशलक्षवर्षाधिकैकसप्ततिमहायुगा भुक्तिकालाः। एवं स्वर्गलोकाधिपतय इन्द्राश्चतुर्दश।

३. कृतत्रेताद्वापरकलिभेदेन युगचतुष्टयम्। तत्र देवतामानेन चतुस्सहस्रवर्षाणि कृतयुगस्य। पूर्वोत्तरं च प्रत्येकं चतुश्शतवर्षाणि सन्धिकालाः। तथा त्रेतायुगस्य त्रिसहस्रवर्षाणि। पूर्वोत्तरं च प्रत्येकं

त्रिशतवर्षाणि सन्धिकालाः। एवं द्वापरयुगस्य द्विसहस्रवर्षाणि। पूर्वोत्तरं प्रत्येकं द्विशतवर्षाणि सन्धिकालाः। तथा कलियुगस्यैकसहस्रवर्षाणि। पूर्वोत्तरं शतवर्षाणि सन्धिकालाः। तथा च द्वादशसहस्रवर्षाणि चतुर्युगस्य। एतच्चतुर्युगस्याप्यावृत्तावेको महायुगः।

४. सृष्टिकालविशेषः कल्पः। स द्विविधः महाकल्पः पाद्मकल्पश्चेति। महदाद्यण्डपर्यन्तं सृष्टिकालो महाकल्पः। अण्डे पद्मचतुर्मुखयोः सृष्टिकालः पाद्मकल्पः। स एव ब्रह्मकल्प इत्युच्यते। ब्रह्मकल्पोऽपि द्विविधः। दिनकल्पो मनुकल्पश्चेति। प्रतिदिनं सृष्टिकालो दिनकल्पोऽष्टादशसहस्रात्मकः। ब्रह्मण एकैकस्मिन्दिने चतुर्दशमनुकल्पाः।

ब्रह्मणः प्रतिदिनं राजसतामसैर्जनैः सात्त्विकजनोपद्रवे सति मत्स्यकूर्माद्यवतारा भविष्यन्ति। तत्रापि वैवस्वतमन्वन्तरे दशावताराः। अन्यत्रान्यावतारा अपि। एतैरवतारैरयोग्यजनसंहारः सज्जनोद्धारश्च भविष्यति।

५. भगवता नानारूपैर्जगत्प्रविश्य जाग्रदाद्यवस्थाभिः पोषणं स्थितिः। अवस्थाश्च जाग्रत्स्वप्नसुषुप्तिमोहतुरीयभेदात्पञ्चविधाः। देहेन्द्रियाद्यभिमानेन तत्तद्विषयानुभवात्सुखदुःखोत्पादो जाग्रदवस्था। तत्प्रवर्तको विश्वनामकः परमात्मा दक्षिणाक्ष्यग्रे स्थितः। स च सप्ताङ्ग एकोनविंशतिमुखः। तदा हृदयस्थजीवस्य दक्षिणाक्षिस्थविश्वप्राप्तिः। सांशजीवानामंशेन। निरंशजीवानां तु प्रकाशतः।

सा चावस्था ब्रह्मादिसर्वचेतनानाम्।

६. देहेन्द्रियाद्यभिमानेन मनसः स्वाप्नपदार्थानुभवः स्वप्नावस्था। तत्प्रवर्तकस्तैजसनामा भगवान् कण्ठदेशगतमनस्संस्थः। सोऽपि सप्ताङ्ग एकोनविंशतिमुखः। स्वप्नावस्था च सर्वजीवानाम्। तत्र जीवस्य तैजसप्राप्तिः।

बाह्यस्वाप्नपदार्थादर्शनेन स्वरूपानुभवः सुषुप्तिः। तत्र सर्वेन्द्रियाणामुपरमः। तत्प्रवर्तकः प्राज्ञः। तदा जीवस्य तत्प्राप्तिः। सा चावस्था रुद्रादिसर्वजीवानाम्। जाग्रदवस्थायां तैजसप्राज्ञाभ्यां विश्वस्यैकीभाव इत्यादि बोध्यम्।

मूर्च्छावस्था मोहावस्था। तदा दुःखमात्रानुभवः। तत्प्रवर्तको भगवान्। रूपविशेषस्तु अस्माभिर्न बुद्धो महान्तः प्रष्टव्याः। सा चावस्था रुद्रादिसर्वजीवानाम्। तत्रार्धप्राप्तिः परमात्मना जीवस्य।

तुरीयावस्था मोक्षः। सा च वक्ष्यते। तत्प्रवर्तकस्तुरीयनामा भगवान्। नासिकामारभ्य द्वादशाङ्गुलपरिमितदेशगतः। एवं गर्भादावपि भगवान् पोषकः।

७. संहारस्तु प्रलयः। स च द्विविधः। महाप्रलयोऽवान्तरप्रलयश्चेति। गुणत्रयमारभ्य ब्रह्माण्डपर्यन्तस्य तदभिमानिब्रह्मादीनां च विनाशो महाप्रलयः। तदेश्वरस्य सञ्जिहीर्षा भवति। तया शेषान्तर्गतस्य परमात्मनो मुखादग्निज्वाला जायते। तया ब्रह्माण्डस्य सावरणस्य भस्मीभावः। कार्याणां कारणेषु लयः। प्रकृतिमात्रावस्थानम्। तदा लक्ष्म्यात्मकं महोदकम्। तत्र वटपत्रे लक्ष्म्यात्मके शून्यनामा

नारायणः शेते। सर्वेऽपि जीवास्तदुदरं प्रविशन्ति। श्वेतद्वीपानन्तासन वैकुण्ठेषु श्रीभागानां न नाशः। अन्धतमसस्य न विनाशः। रौरवाद्यनित्यनरकाणां च विनाशः। प्रकृत्या क्षणलवादिकालमात्र सृष्टिः।

अवान्तरप्रलयस्तु द्विविधः। दैनन्दिनप्रलयो मनुप्रलयश्चेति। प्रतिदिनं ब्रह्मणो रात्र्यागमे विनाशो दैनन्दिनप्रलयः। तत्र भूरादिलोक त्रयमात्रस्य विनाशः। इन्द्रादयस्तु तदा महर्लोकादिकं गच्छन्ति। एकैकमनुभुक्तिकालसमाप्तौ यो विनाशः स मनुप्रलयः। तदा भूरादिलोकत्रयनाशो नास्ति। भूलोकस्थमनुष्यादिमात्रविनाशः। लोकद्वयस्थानां तु महर्लोकादिगमनम्। तदा लोकत्रयस्याप्युदकेन पूर्तिः।

८. नियमनं च येन येन क्रियते तत्सर्वं परमात्मप्रेरणयैव क्रियत इति परमात्मप्रेरणमेव।

९. येन येन साधनेन यस्य यस्य यद्यज्ज्ञानं जायते तत्सर्वं परमात्मना जन्यत इति ज्ञानमपि परमात्माधीनम्। तद्विविधम्। संसारहेतुर्मोक्षहेतुश्चेति। देहापत्यकलत्रादिषु ममतादिरूपं ज्ञानं संसारहेतुः। मोक्षसाधनं च ज्ञानं योग्यापरोक्षरूपम्। तद्बहुसाधनस म्पत्तिजन्यम्। चतुर्मुखमारभ्य मनुष्योत्तमपर्यन्तं सज्जीवानामेवापरो क्षज्ञानं जायते। न तु तमोयोग्यानाम्। एकैकस्मिन् ब्रह्मकल्पे एकैकस्य ऋजोरपरोक्षज्ञानम्। एकैकस्य मुक्तिः।

५. मोक्षसाधननिरूपणम्

१. मोक्षसाधनीभूतापरोक्षज्ञानसाधनानि च विविधसांसारिकदुःखदर्शनेन सज्जनसङ्गत्या चेहामुत्रफलभोगविरागः शमदमादिसम्पत्तिः अध्ययनसम्पत्तिः शरणागतिः गुरुकुलवासः सदुपदेशेन सच्छास्त्रार्थज्ञानरूपं श्रवणं श्रुतस्य तत्त्वस्य दृढीकरणाय मीमांसापरपर्यायो विचारो मननं गुरुभक्तिर्यथायोग्या परमात्मभक्तिः स्वाधमेषु सत्सु दया स्वसमेषु स्वात्मवत्स्नेहः उत्तमेषु भक्तिः निवृत्तकर्मानुष्ठानं निषिद्धसन्त्यागः सर्वसमर्पणं तारतम्यपरिज्ञानं पञ्चभेदज्ञानं प्रकृति-पुरुषविवेकज्ञानम् अयोग्यनिन्दा उपासना चेति ब्रह्मादिसर्वयोग्यजीवसाधारणानि।

२. गुरवोऽपि द्विविधाः। नियतगुरवोऽनियतगुरवश्चेति। शिष्यस्वरूपं सम्यग्ज्ञात्वा तद्योग्यविशिष्टभगवद्रूपविशेषविषयकविद्योपदेशकर्तारो नियतगुरवः। मनुष्योत्तमस्य ऋषयः। ऋषीणां चक्रवर्तिनां च ऋषयो देवाश्च। देवानां च स्वोत्तमा देवाः। तत्रापि सूर्यचन्द्रपदयोग्यौ देवौ सुरूपशान्तरूपनामकौ यौ तयोः सुमनोनामकगरुडपदयोग्यो देवो नियतगुरुः। तथा शक्रपदयोग्यस्य सुमन्तनामकस्य सुमनोनामकगरुडपदयोग्य एव नियतगुरुः। सुमनोनामकगरुड पदयोग्यस्योग्रतपोनामकरुद्रपदयोग्यस्य च ब्रह्मपदयोग्यः ऋजुर्लातव्यो नियतगुरुः। तत्र मनुष्यादीनां बहुजन्मसु श्रवणम्। सूर्यचन्द्रपदयोग्ययोस्तु मन्वन्तरचतुष्टयं श्रवणकालः। इन्द्रपदयोग्यस्य दशमन्वन्तरं

श्रवणकालः। रुद्रगरुडपदयोग्ययोस्तु सार्धपरार्धकालः।

३. अनियतगुरवस्तु भगवत्तत्वमात्रोपदेष्टारः। तेभ्योऽपि श्रोतव्यमेव। पूर्वप्राप्तगुरुस्सर्वथा न त्याज्यः। तदुत्तमप्राप्तौ पूर्वानुज्ञा न मृग्यते। समप्राप्तौ विकल्पः। अधमप्राप्तौ पूर्वानुज्ञा मृग्यत एव। स्वोत्तमास्सर्वेऽपि गुरवो ब्रह्मपर्यन्तम्। तेषु तत्तन्माहात्म्यानुसारेण भक्तिः कर्तव्या। मोक्षार्थमनुज्ञाप्रदातृत्वात्। ज्ञानप्रयोजकत्वात्। शिष्यानुष्ठितश्रवणादिफलभोक्तृत्वाच्च। तत्र गुरोः शिष्यापेक्षयाष्टभागाधिकफलं भविष्यति। तस्मादपि तद्गुरोः द्विगुणं फलम्। तस्मात्सार्धफलमपरेषाम्। तेभ्यः सहस्रगुणितं फलं देवानाम्। तेभ्यश्चतुर्मुखस्य महौघगुणितं फलम्। तत्र द्वात्रिंशल्लक्षणवत्त्वाद्ब्रह्मोत्तमोत्तमगुरुः। रुद्रादयस्तु क्रमाल्लक्षणहीना अमुख्या गुरवः। अतो गुरुभक्त्या गुरुप्रसादस्सम्पादनीयः।

तारतम्यं चास्मद्गुरुपादैस्सम्यगुपपादितं तारतम्यस्य सङ्ग्रहे तत्रैवानुसन्धेयम्।

४. उपासना च द्विविधा। सततं शास्त्राभ्यासरूपा ध्यानरूपा चेति। तत्र केषाञ्चिदधिकारिणां सततं शास्त्रालोडनेनापरोक्षज्ञानं जायते। केषाञ्चिद्ध्यानेन।

ध्यानं चेतरतिरस्कारपूर्वकभगवद्विषयकाखण्डस्मृतिः। तदेव निदिध्यासनम्। तच्च श्रवणमननाभ्यामज्ञानसंशयमिथ्याज्ञाननिरासेन इदमित्थमिति निश्चयवतो भवति। सा चोपासना आत्मत्वमात्रगु

णविशिष्टत्वेन भगवद्विषया एकगुणोपासकानाम्। सच्चिदानन्द आत्मेति चतुर्गुणविशिष्टभगवद्रूपविषया मनुष्योत्तमानाम्। देवर्ष्यादीनां तु यथायोग्यं बहुगुणविशिष्टव्याप्तभगवद्रूपविषया। देवेष्वपि ब्रह्मा वेदोक्तानन्तगुणक्रियाविशिष्टानन्तरूपोपासनां करोति। सरस्वती तु क्रियांशे सामान्याकारेणैवोपासनां करोति। गरुडरुद्रौ च गुणक्रिययोः सामान्याकारेणानन्तभगवद्रूपोपासनां कुरुतः। इन्द्रादयस्तु गुणसामान्यतः क्रियासामान्यतो रूपसामान्यत उपासनां कुर्वन्ति।

देहान्तर्गतबिम्बोपासना केषाञ्चिदृषीणाम्। अग्निप्रतिमयोरुपासना मनुष्याणाम्। व्याप्तोपासना देवानाम्। केषाञ्चिदृषीणां गन्धर्वाणामप्सरसां च। सर्वैरपि विम्बरूपोपासनं कर्तव्यमेव। बिम्बरूपं च प्राज्ञरूपमिति सम्प्रदायविदः। तत् त्रिविधं प्रादेशमूलेशाग्रेशभेदात्। हृदयस्थप्रादेशोपासनायोग्याश्च केचन। हृत्कर्णिकामूलगताङ्गुष्ठाग्रपरिमाणरूपमूलेशोपासकाश्च केचन। हृत्कर्णिकाग्रगतांगुष्ठपरिमितभगवद्रूपोपासकाश्च केचन।

९. ऋजूनां शतब्रह्मकल्प उपासनाकालः। रुद्रगरुडपदयोग्ययोस्तु चत्वारिंशद्ब्रह्मकल्पेषु मोक्षप्रयत्नः। शक्रस्य विंशतिकल्पेषु प्रयत्नः। सूर्यादीनां दशकल्पेषु प्रयत्नः। रुद्रपदयोग्यस्य सार्धस्य त्रिभागकाल उपासनाकालः। शक्रपदयोग्यस्य मन्वन्तरचतुष्टयमुपासनाकालः। सूर्यचन्द्रपदयोग्ययोस्तु एकमन्वन्तरमुपासनाकालः।

अन्येषां त्वेकमन्वन्तर एवोपासनाकालाः कतिपयाः ।

६. पञ्चभेदास्तु जीवेशयोर्भेदः जीवानां च परस्परं भेदः जडेशयोर्भेदः जडानां च परस्परं भेदः जडजीवयोर्भेदः । एते पञ्चभेदा अनादिनित्या मुक्तावप्यनुस्यूताः ।

७. एतत्साधनसम्पत्त्या ब्रह्मादिमानुषांतमपरोक्षज्ञानं यथा योग्यं जायते । तत्र मनुष्योत्तमानां विद्युद्वद्ब्रह्मापरोक्षज्ञानम् । सूर्यमण्ड लवत्तेजःपुञ्जत्वेन भगवद्विषयमपरोक्षज्ञानं देवानाम् । प्रतिबिम्बवद्ग रुड रुद्रयोः । ब्रह्मणस्तु यावदवयवविशिष्टत्वेन स्पष्टं भगवदपरोक्षज्ञानम् । व्याप्तोपासकानां केषाञ्चिद्ब्रह्माण्डान्तर्गततन्मा त्रपरिमितभगवद्रूपा- परोक्षज्ञानम् । सूर्यावराणां देवानां ब्रह्माण्डाद्बहि रपि पञ्चभूतपर्यन्तं स्थितभगवद्रूपापरोक्षज्ञानम् । चन्द्रसूर्यौ तु मनस्त त्त्वपर्यन्तं व्याप्तभगवद्रूपं पश्यतः । उमासौपर्ण्यौ महत्तत्त्वपर्यन्तं व्याप्तरूपं पश्यतः । गिरिशगरुडौ तमोगुणपर्यन्तं व्याप्तभगवद्रूपं पश्यतः । वाणी त्रैगुण्यात्परतः शतगुणितं व्याप्तरूपं पश्यति । ब्रह्मा तु यावदव्याकृताकाशं व्याप्तभगवद्रूपं पश्यति ।

ब्रह्मणः शतब्रह्मकल्पात्पूर्वं योग्यापरोक्षज्ञानं जायते । पञ्चाश द्ब्रह्मकल्पात्पूर्वं शिवगरुडपदयोग्ययोः । इन्द्रकामयोर्विंशति ब्रह्मकल्पा त्पूर्वमपरोक्षज्ञानम् । सूर्यादीनां तु दशब्रह्मकल्पात्पूर्वमपरोक्षज्ञानं जायते । अन्येषामेकब्रह्मकल्प एव ज्ञानं जायते । अपरोक्षज्ञानं च अणिमाद्यष्टैश्वर्यं च देवादीनामपरोक्षज्ञानजन्यम् ।

८. तमोयोग्यानां तु नापरोक्षम्। किं तु द्वेषपरिपाक एव तमस्साधनम्। तत्साधनानि तु विषयलोलता त्रिविधगुरुद्वेषः नवविध हरिद्वेषः। एवं ज्ञानस्य परमात्माधीनत्वम्।

९. तथाज्ञानमपि परमात्माधीनम्। बन्धोऽपि जीवस्य परमा त्माधीनः। बन्धास्तु ईश्वरेच्छाविद्याकामकर्मलिङ्गशरीरं त्रिगुणात्मकं मनः स्थूलशरीरमित्यादि। एवं च सृष्ट्यादयो बन्धान्ताः परमात्मा धीनाः।

६. मोक्षस्वरूपनिरूपणम्

१. तन्मोक्षोऽपि परमात्माधीनः। तथाहि अपरोक्षज्ञानानन्तरं परमभक्तिर्जायते। ततोऽत्यर्थप्रसादः। तस्मात्प्रकृत्यविद्यादिभ्यो मोक्षः।

स चतुर्विधः कर्मक्षय उत्क्रान्तिर्लयोऽर्चिरादिमार्गो भोगश्चेति। कर्मक्षयस्त्वपरोक्षज्ञाने जाते सञ्चितस्य सर्वस्यापि पाप स्यानिष्टस्य पुण्यस्य च सर्वात्मना विनाशः। विनाशो नाम अनिष्टपुण्यस्य कस्यचित्सुहृद्भ्यो दानम्। पापस्य कस्यचिद्द्वेषिभ्यो दानम्। केषाञ्चित्स्वरूपत एव नाशः। प्रारब्धकर्मणस्तु भोगेनै वनाशः। ब्रह्मणः शतब्रह्मकल्पपर्यन्तं पुण्यं प्रारब्धफलस्य सत्यलोका धिपत्यादेरनुभवः। गरुडशेषयोः पञ्चाशद्ब्रह्मकल्पपर्यन्तं पुण्यपापरूप प्राब्धस्यानुभवः। इन्द्रकामयोर्विंशतिब्रह्मकल्पपर्यन्तं पुण्यपाप-

प्रारब्धानु भवः। सूर्यचन्द्रादीनां देवानां दशकल्पपर्यन्तं प्रारब्धानुभवः। अन्येषां मनुष्योत्तमानां त्वेकब्रह्मकल्पमात्र इति।

२. प्रारब्धानुभवानन्तरं च ब्रह्मनाड्या देहादुत्क्रामन्ति। सुषुम्ना नाडी ब्रह्मनाडी। सा मूलाधारमारभ्य मूर्धपर्यन्तमृजुरूपेण दीर्घशलाकावद्देहे वर्तते। सैव पञ्चभेदिनी।

तथा ज्ञानिनो द्विविधाः प्रतीकालम्बना अप्रतिकालम्बनाश्चेति। देहादि प्रतीकेऽपरोक्षज्ञानवन्तः प्रतीकालम्बनाः। तदन्यत्रापरोक्षज्ञानवन्तोऽप्रतीकालम्बनाः। अप्रतीकालम्बनानां देवादिव्यतिरिक्तानां केषाञ्चित्सुषुम्नानाडीमध्यादुत्क्रमणम्। तत्काले हृदयस्याग्रं प्रद्योतते। तत्प्रकाशितद्वारो निष्क्रामति। तदा प्राज्ञेनान्वारूढो भवति। तत्परमात्मनोऽग्रतो वायुर्गच्छति। तथाऽर्चिरादि मार्गेण गमनं भवति। तत्र तुरीयनामकभगवत्प्राप्तिश्च।

प्रतीकालम्बनानां त्वन्तकाले नियमतो भगवत्स्मरणं जायते। सुषुम्नानाडीपार्श्वस्थनाड्या भगवत्प्रकाशयुक्तद्वारागमनम्। अर्चिरदि लोकप्राप्तिः। क्रमेण वायुलोकप्राप्तिः। वायुलोकप्राप्त्यनन्तरं च वायुरेव चतुर्मुखलोकं नयति। स च स्वशरीरलयानन्तरं वैकुंठं नयति।

एवमेकगुणोपासकानामपरोक्षज्ञानानन्तरं न शरीरादुत्क्रमणम्। किं तु शरीरस्य श्वैतीभावेनोच्छूनता जायते। ततः क्रमेण शरीरस्य विनाशः। तेषां च पृथिव्यादावेवावस्थानम्।

सर्वेषामपि सत्यलोके चतुर्मुखोपदेशः। श्वेतद्वीपे वासुदेवदर्शनम्। ध्रुवलोकस्थशिंशुमारदर्शनं च नियतम्।

तमोयोग्यानामपि द्वेषपरिपाकानन्तरं देहादुत्क्रमणं भवति। सर्वेषां कलिप्राप्तिः। कलेस्तु ब्रह्मणा सह लिङ्गभङ्गो वायुगदाप्रहाराद्भवति।

३. नित्यसंसारिणामपि लिङ्गभङ्गः। अन्यथा तत्स्वरूपमात्रस्य कदाप्यनुभवाभावप्रसङ्गात्। साधनानुष्ठानवैयर्थ्यप्रसङ्गाच्च।

